श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्विसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विसप्ततितमः सर्गः ॥

## वाल्मीकितो लब्धानुज्ञस्य शत्रुघ्नस्यायोध्यां गत्वा श्रीरामादिभिः सह समागमः सप्त दिनानि तत्रोषित्वा ततः पुनर्मधुरां प्रति प्रस्थानं च

तं शयानं नरव्याघ्रं निद्रा नाभ्यागमत् तदा।
चिन्तयानमनेकार्थं रामगीतमनुत्तमम् ॥ **7.72.1** ॥

तस्य शब्दं सुमधुरं तन्त्रीलयसमन्वितम्।
श्रुत्वा रात्रिर्जगामाशु शत्रुघ्नस्य महात्मनः ॥ **7.72.2** ॥

तस्यां रजन्यां व्युष्टायां कृत्वा पौर्वाह्णिकक्रमम्।
उवाच प्राञ्जलिर्वाक्यं शत्रुघ्नो मुनिपुङ्गवम् ॥ **7.72.3** ॥

भगवन् द्रष्टुमिच्छामि राघवं रघुनन्दनम्।
त्वयानुज्ञातुमिच्छामि सहैभिः संशितव्रतैः ॥ **7.72.4** ॥

इत्येवंवादिनं तं तु शत्रुघ्नं शत्रुसूदनम्।
वाल्मीकिः सम्परिष्वज्य विससर्ज स राघवम् ॥ **7.72.5** ॥

सोऽभिवाद्य मुनिश्रेष्ठं रथमारुह्य सुप्रभम्।
अयोध्यामगमत् तूर्णं राघवोत्सुकदर्शनः ॥ **7.72.6** ॥

स प्रविष्टः पुरीं रम्यां श्रीमानिक्ष्वाकुनन्दनः।
प्रविवेश महाबाहुर्यत्र रामो महाद्युतिः ॥ **7.72.7** ॥

स रामं मन्त्रिमध्यस्थं पूर्णचन्द्रनिभाननम्।
पश्यन्नमरमध्यस्थं सहस्रनयनं यथा॥ **7.72.8**॥

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा।
उवाच प्राञ्जलिर्भूत्वा रामं सत्यपराक्रमम्॥ **7.72.9**॥

यदाज्ञप्तं महाराज सर्वं तत् कृतवानहम्।
हतः स लवणः पापः पुरी चास्य निवेशिता॥ **7.72.10**॥

द्वादशैतानि वर्षाणि त्वां विना रघुनन्दन।
नोत्सहेयमहं वस्तुं त्वया विरहितो नृप॥ **7.72.11**॥

स मे प्रसादं काकुत्स्थ कुरुष्वामितविक्रम।
मातृहीनो यथा वत्सो न चिरं प्रवसाम्यहम्॥ **7.72.12**॥

एवं ब्रुवाणं शत्रुघ्नं परिष्वज्येदमब्रवीत्।
मा विषादं कृथाः शूर नैतत् क्षत्रियचेष्टितम्॥ **7.72.13**॥

नावसीदन्ति राजानो विप्रवासेषु राघव।
प्रजा च परिपाल्या हि क्षात्रधर्मेण राघव॥ **7.72.14**॥

काले काले तु मां वीर अयोध्यामवलोकितुम्।
आगच्छ त्वं नरश्रेष्ठ गन्तासि च पुरं तव॥ **7.72.15**॥

ममापि त्वं सुदयितः प्राणैरपि न संशयः।
अवश्यं करणीयं च राज्यस्य परिपालनम्॥ **7.72.16**॥

तस्मात् त्वं वस काकुत्स्थ सप्तरात्रं मया सह।
ऊर्ध्वं गन्तासि मधुरां सभृत्यबलवाहनः॥ **7.72.17**॥

रामस्यैतद् वचः श्रुत्वा धर्मयुक्तं मनोऽनुगम्।
शत्रुघ्नो दीनया वाचा बाढमित्येव चाब्रवीत्॥ **7.72.18**॥

सप्तरात्रं च काकुत्स्थो राघवस्य यथाज्ञया।
उष्य तत्र महेष्वासो गमनायोपचक्रमे॥ **7.72.19** ॥

आमन्त्र्य तु महात्मानं रामं सत्यपराक्रमम्।
भरतं लक्ष्मणं चैव महारथमुपारुहत्॥ **7.72.20** ॥

दूरं पद्भ्यामनुगतो लक्ष्मणेन महात्मना।
भरतेन च शत्रुघ्नो जगामाशु पुरीं तदा॥ **7.72.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विसप्ततितमः सर्गः॥